डाप्।) पार्व्वती। इति त्रिकाण्डशेषः॥ यथा, मार्कण्डेये। ९१। ४७-४९।
"यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति।
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्व्वतः॥"

भ्राश, ऋ ङ ञ टु } भासि। इति कविकल्पद्रुमः॥
भ्राश, य ङ } (भ्वा०-आत्म०-अक०-सेट्। द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ङ भ्राश्यते। ऋ अबभ्राशत्। स्वमते अनयोर्ण्यन्तेऽपि ह्रस्वविकल्पनेऽपि सप्तमस्वरानुबन्धोऽन्येषामनुरोधात्। ञ भ्रेशे बभ्राशे। टु भ्राशथुः। ङ भ्राशते। भासि दीप्तौ। इति दुर्गादासः॥

भ्राष्ट्रं, क्ली, (भ्रस्ज+ष्ट्रन्।) आकाशम्। अम्बरीषम्। इति संक्षिप्तसारोणादिवृत्तिः॥

भ्राष्ट्रः, पुं, (भृज्ज्यते अन्नेति। भ्रस्ज+"भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च।" उणा०। ४। १५९। इति। ष्ट्रन्।) यत्र कलायचणकादिकं भृज्यते सः। भाजना खोला इति ख्यातः। (यथा, नैषधचरिते। ३। १२८।
"रौद्रे चक्षुषि तन्वितस्तनुमनुभ्राष्ट्रं च यक्षिक्षिपे॥"
"अनुभ्राष्ट्रं भर्ज्जनपात्रसदृशेन।" इति तट्टीका।) तत्पर्य्यायः। अम्बरीषम् २। इत्यमरः।२।९।३०॥

भ्रास, ऋ ङ ञ टु } भासि। इति कविकल्पद्रुमः॥
भ्रास, य ङ } भ्वा०-आत्म०-अक०-सेट्। द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ङ भ्रास्यते। ङ भ्रासते। ऋ अबभ्रासत्। ञ भ्रेसे बभ्रासे। टु भ्रासथुः। इति दुर्गादासः॥

भ्रुकुंसः,पुं, (भ्रकुंसः। भ्रुकुंसः। भ्रूकुंसः। भृकुंसः। इति रूपचतुष्टयम्। "चुरादौ पठपुटेत्यादिदण्डके कुसिर्भाषार्थः। यः स्त्रीवेशं धारयित्वा भ्रुवः कुंसयतीति। शरच् प्रत्ययः। ह्रस्वश्च वा। इति अमरटीकायां रघुनाथचक्रवर्त्ती॥) स्त्रीवेशधारिनर्त्तकपुरुषः। इत्यमरः।१।७।११॥

भ्रुकुटिः, स्त्री, (भ्रुवः कुटि कौटिल्यमिति षष्ठीसमासः। अभ्रुकुंसादीनामिति वा ह्रस्वः।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, महाभारते।७। ७९२।
बद्ध्वा च भ्रुकुटिं वक्त्रे क्रोधस्य परिलक्षणम्॥")

भ्रकुटी, स्त्री, (भ्रुकुटि। कृदिकारादिति पक्षे ङीष्।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, माघे। १५। ९।
"भ्रुकुटीकटोरितललाटमाननम्॥")

भ्रूः, स्त्री, (भ्राम्यति नेत्रोपरि इति। भ्रम+"भ्रमेश्च डूः।" उणा० २। ६८। इति डूः।) दृगभ्यामूर्द्धभागः। तत्पर्य्यायः। चिल्लिका २ नयनोर्द्धभागरोमराजी३। इति राजनिर्घण्टः॥ तल्लक्षणं यथा, गारुडे ६६ अध्याये।
"विशालोन्नता सुखिनि दरिद्रा विषमभ्रुवः।
धनी दीर्घा संसक्तभ्रूर्बालेन्दूनतसभ्रुवः।
आढ्या निस्वश्च खड्गभ्रूर्मध्यास्य विनतभ्रुवः॥"

अत्र षट्चक्रान्तर्गताज्ञाख्यचक्रमस्ति। तत्तु हक्षवर्णद्वययुक्तद्विदलपद्माकारम्। तन्मध्ये मनस्तिष्ठति। यथा,—
"आज्ञानामाम्बुजं तद्धिमकरसदृशं ध्यानधामप्रकाशं
हक्षाभ्यां वै कलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रम्।
तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना
विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता॥
एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्॥"
इति श्रीतत्त्वचिन्तामणौ षष्ठप्रकाशः॥
(विषयोऽस्या यथा,—
"भ्रुवोर्वा यदि वा मूर्द्ध्नि सीमन्तावर्त्तकान् बहून्।
अपूर्व्वानकृतान् व्यक्तान् दृष्ट्वा मरणमादिशेत्॥
त्र्यहमेते न जीवन्ति लक्षणेनातुरा नराः।
अरोगाणां पुनस्त्वेतत् षड्रात्रं परमुच्यते॥"
इति चरके इन्द्रियस्थाने अष्टमेऽध्याये॥
कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनवृषपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विंशतिरङ्गुलयः। इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

भ्रूकुंसः, पुं, (भ्रू+कुंस+अच्। स्त्रीवेशधारी नर्त्तकपुरुषः। इत्यमरः। १। ७। ११।

भ्रूकुटिः, स्त्री, (भ्रुवः कुटिः कौटिल्यम्। क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः॥

भ्रूण, क ङ आशाविशङ्कयोः। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) रेफयुक्तषष्ठस्वरी। क ङ भ्रूणयते भद्रं लोकः। आशाविषयं करोतीत्यर्थः। इति दुर्गादासः॥

भ्रूणः, पुं, (भ्रूण्यते आशास्यते इति। भ्रूण+घञ्।) बालकः। स्त्रीगर्भः। इत्यमरः २।६।३९॥ (क्लीवमपि। यथा, ऋग्वेदे। १०। १५५। २।
"चत्तो इतश्चत्तामुतः सर्व्वा भ्रूणान्यारुषी॥")
अथ गर्भाधानदिनम्। रजोदर्शनावधिषोडशदिनपर्य्यन्तं ऋतुकालः। तत्राद्यास्तस्रो निशाः परित्यज्य चतुर्द्दश्यष्टमी अमावास्या पूर्णिमा सूर्य्यसंक्रान्तिः पर्व्वाण्येतानि परित्यज्य च अन्यासु रात्रिषु चन्द्रादिशोभने काले भार्य्यामुपगच्छेत्। युग्मरात्रिषु गमने पुत्त्रो भवेत्। अयुग्मरात्रिषु गमने कन्या भवेत्। तत्र प्रशस्तनक्षत्राणि पुष्यः हस्ता मृगशिरा आर्द्रा पुनर्व्वसुः पूर्व्वाषाढ़ा उत्तराषाढ़ा श्रवणा पूर्व्वभाद्रपदुत्तरभाद्रपत्। तत्र निषिद्धनक्षत्राणि। ज्येष्ठाश्लेषा मघा मूला रेवती कृत्तिकाश्विनी उत्तरफल्गुनी। तत्र तिथयः नन्दा भद्राः प्रशस्ताः। रिक्ता निषिद्धाः। तत्र रविमङ्गलबृहस्पतिवाराः प्रशस्ताः। इति समयप्रदीपः॥

भ्रूणहत्या, स्त्री, (हननं हत्या। हन्+भावे क्यप्। भ्रूणस्य हत्या इति षष्ठीसमासः।) गर्भस्थबालकहननम्। यथा,—
"त्रिविवाहं कृतं येन न करोति चतुर्थकम्।
कुलानि पातयेत् सप्त भ्रूणहत्याव्रतञ्चरेत्॥"
इत्युद्वाहतत्त्वम्॥

भ्रूणहा, [न्] त्रि, (भ्रूणं हन्तीति। भ्रूण+हन्+"ब्रह्मभ्रूणवृत्रेषु।" ३। २। ८७। इति क्विप्।) गर्भस्थबालकहन्ता। भ्रूणं हन्ति इति भ्रूणशब्दोपपदहनधातोः क्विप्प्रत्ययेन निष्पन्नः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, महाभारते। १। ८३। ३४।
"ऋतुं वै याचमानाया न ददाति पुमानृतुम्।
भ्रूणहेत्युच्यते ब्रह्मन्! स इह ब्रह्मवादिभिः॥")
तस्य प्रायश्चित्तम्। तत्र पुंस्त्वेन ज्ञाते पुंवधप्रायश्चित्तम्। स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम्। अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः।
"हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत्।
गर्भहा च यथावर्णं तथात्रेयीनिषूदनः॥"
इति प्रायश्चित्तविवेकः॥
(ब्रह्महन्ता। यथा, मनुः। ८। ३१७।
"अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी॥"
"भ्रूणहा ब्रह्महा।" इति तद्भाष्ये मेधातिथिः॥)

भ्रूभङ्गः, पुं, (भ्रुवो भङ्गः।) भ्रुवः कौटिल्यम्। यथा,
"क्षुद्राः सन्त्रासमेते विजहत हरयो भिन्नशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी शायका निष्पतन्तः।
सौमित्रे तिष्ठ पात्रं त्वमपि नहि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि॥"
इति काव्यप्रकाशः॥

भ्रेज, ऋ ङ भासि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) रेफयुक्तः। ऋ अबिभ्रेजत्। ङ बिभ्रेजे। इति दुर्गादासः॥

भ्रेष, ऋ ञ चले। भये। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) रेफयुक्तः। ऋ अबिभ्रेषत्। ञ भ्रेषति भ्रेषते धर्म्मात् खलः। बिभ्रेषे। इति दुर्गादासः॥

भ्रेषः, पुं, (भ्रेष् चलने+भावे घञ्।) तथाच यथोचितादृभ्रंशः। इत्यमरः॥ (यथा, पातञ्जलभाष्ये। ३।१२। "आसमाबिभ्रेषात्।" इति।) चलनम्। इति भ्रेषधात्वर्थदर्शनात्॥

भ्रेषणं, क्ली, (भ्रेष्+भावे ल्युट्।) चलनम् इति भ्रेषधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥

भ्लक्ष, ञ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०सेट्।) अन्तःस्थतृतीयोपधः। ञ भ्लक्षति भ्लक्षते। लस्थाने सप्तमस्वर इति दुर्गसिंहः। इति दुर्गादासः॥

———